# Ghatikadrinatha Shatakam

# ઘટિકાદ્રિનાથશતકમ્

## Document Information

Text title : Ghatikadrinatha Shatakam

File name : ghaTikAdrinAthashatakam.itx

Category : vishhnu, shataka, dashAvatAra

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# ઘટિકાદ્રિનાથશતકમ્

શ્રીવેઙ્કટાર્યચરણૌ શિરસિ કરોમિ સ્મિતાબ્જસુહૃદૌ તૌ ।
પૃથુતરમપિ ભવજલધિં પિબતિતરાં યત્પરાગપરમાણુઃ ॥

વ્યત્યસ્તચરણકમલાં વિનિહિતભુજયુગલમિત્રજાનુયુગામ્ ।
વિલસિતરથાઙ્ગશઙ્ખાં વ્યક્તિમુપાસે વિરુદ્ધજાતિમતીમ્ ॥ ૧॥

શ્રિતઘટિકાચલશૃઙ્ગં શીતલકરુણાતરઙ્ગિતાપાઙ્ગમ્ ।
મનસિ મમોલ્લસદઙ્ગં વસ્તુ મહઃ કિમપિ વાસસા પિઙ્ગમ્ ॥ ૨॥

કલિતદનુતનયભઙ્ગં કરકમલાભરણવારિજરથાઙ્ગમ્ ।
કૃતઘટિકાચલસઙ્ગં કિમપિ મહો જયતિ કેતનવિહઙ્ગમ્ ॥ ૩॥

સર્વરસગન્ધભરિતં સઙ્ગતમેકમપિ સકલશાખાસુ ।
અમૃતફલમખિલપુંસામાસ્વાદ્યં ચિત્રમસ્તિ ઘટિકાદ્રૌ ॥ ૪॥

આરણ્યકાપ્તવાક્યૈરવગમ્યો ગ્રામ્યજનદૃશામપદમ્ ।
સ્ફુરતિ ઘટિકાચલાગ્રે પુરુષમૃગઃ કોઽપિ પુણ્યકૃદુપેયઃ ॥ ૫॥

મહતિ ઘટિકાદ્રિવિષયે મહતા સ્નેહેન નિર્મલદશાયામ્ ।
દેદીપ્યતે સ્થિરોઽયં દિવ્યૈર્મુનિભિઃ પ્રવર્તિતો દીપઃ ॥ ૬॥

મુષ્ણંસ્તમો જનાનાં મૂર્ધનિ ઘટિકાચલસ્ય સમ્ભૂતઃ ।
આલોકતોઽખિલાર્થાનધિગમયતિ નિત્યમચ્યુતો દીપઃ ॥ ૭॥

રસ્યં સકૃદુપસેવ્યં લભ્યમપથ્યસહમસહિતમમોઘમ્ ।
ત્વરિતં હરતિ ભવાર્તિં શુદ્ધં ઘટિકાદ્રિમૌલિજં મૂલમ્ ॥ ૮॥

સ્થિરશોકશલ્યહરણં જગતાં વિચ્છિન્નકુશલસન્ધાનમ્ ।
સઞ્જીવનમપિ ઘટિકાશૈલજમૂલં કરોતિ સારૂપ્યમ્ ॥ ૯॥

અતિબલભવાહિદષ્ટાનમિલાષવિષાગ્નિમૂર્ચ્છનાનષ્ટાન્ ।
ઘટિકાશિખરિનરેન્દ્રો ઘટયત્યસુભિઃ કટાક્ષમાત્રેણ ॥ ૧૦॥

ચોરં સ્વતશ્ચ્યુતં માં સ્વામી ઘટિકાદ્રિપો વિચિન્વાનઃ ।
દૃષ્ટ્વા કુતોઽપ્યુપાયાદ્ દૃમમબધ્નાદ્ દયાગુણેન દૃઢમ્ ॥ ૧૧॥

વિમલકવિસેવ્યમાના વિલસતિ સન્નિહિતશઙ્ખચક્રાબ્જા ।
કાપિ ઘટિકાદ્રિશિખરે કરુણારસપૂરનિર્ભરા સરસી ॥ ૧૨॥

નિર્મુક્તભોગશુદ્ધાન્ નિત્યમહીનાન્ વહન્ નિજાસક્તાન્ ।
ભાતિ ઘટિકાદ્રિશિખરે ભદ્રશ્રીઃ કોઽપિ પરિમલઃ શાખી ॥ ૧૩॥

કરુણામૃતરસવર્ષૈર્ઘટિકાચલઘટિતકાલમેઘ નિજૈઃ ।
સંસરણતરણિતપ્તં સઞ્જીવય વિનતસસ્યજાલમિદમ્ ॥ ૧૪॥

વિમલતરભક્તિપૂરે વ્યપગતપઙ્કે વિકસ્વરામ્બુરુહે ।
માનસસરસિ મુનીનાં રમતે ઘટિકાદ્રિરાજહંસ ભવાન્ ॥ ૧૫॥

સ્તમ્ભો હિ વિઘ્નકારી સન્દૃષ્ટો જગતિ સર્વકાર્યેષુ ।
દાનવવિદારણે તે તસ્યૈવ હરે કથં નુ સાચિવ્યમ્ ॥ ૧૬॥

દેવત્વમાગમાન્તે સિદ્ધં તિર્યક્ત્વમપિ નરત્વેન ।
સહ દૃષ્ટમદ્ય ઘટિકાદ્રિસ્થાવરસર્વાત્મકસ્ય કિમયુક્તમ્ ॥ ૧૭॥

પઞ્ચાસ્ય એવ હિ ત્વં પ્રથિતો ભગવન્ કથં સહસ્રાસ્યઃ ।
ઘટિકાદ્રિપક્ષપાતિન્ ખ્યાતોઽસિ કથં નુ વિશ્વસાક્ષીતિ ॥ ૧૮॥

બહુદેશમલ્પદેશાદપિ સિંહત્વાદધઃસ્થિતં પુંસ્ત્વમ્ ।
મૂર્તૌ તવાત્ર નૃહરે મુખ્યઃ કો વાવમન્યતેઽન્યેન ॥ ૧૯॥

પુંસૂક્તપૂર્વકૈસ્તૈઃ પુરુષત્વં મુખ્યમેવ તે વિદિતમ્ ।
કથમિયમમુખ્યતાસ્મિન્ ઘટતે ઘટિકાદ્રિમનુજમૃગરાજ ॥ ૨૦॥

વિદધતિ ન ભાગ્યલક્ષ્મીવિરહવિલાસાત્તવિકૃતયો મનુજાઃ ।
શ્રવણામૃતેષુ ઘટિકાશૈલવનપ્રિય વચઃસુ તે શ્રદ્ધામ્ ॥ ૨૧॥

કાર્યં હિરણ્યહરણં ઘટિકાચલલુબ્ધ કંસમુખ્યહરણં વા ।
અહરસ્ત્વમાશ્રિતાનાં હન્ત કિમખિલાન્યનર્થજાતાનિ ॥ ૨૨॥

દોષા મમાન્તરહિતાઃ સ્વામિન્ ઘટિકેન્દ્ર તાવકાશ્ચ ગુણાઃ ।
તદપિ ગુણૈસ્ત્વદુપઘ્નૈઃ સ્થાને હીનાશ્રિતા જિતા દોષાઃ ॥ ૨૩॥

પાદામ્બુજેન લસતા પ્રસૃમરમધુના પરાર્ધ્યગન્ધેન ।
શ્રયતાં શમયસિ ઘટિકાશૈલપ વિપરીતવાસનાઃ સકલાઃ ॥ ૨૪॥

પ્રગુણા પરં પ્રસાદં પ્રાપ્તા નિપુણેન પદવિદા ગ્રથિતા ।
સુતરાં ત્વયૈવ ઘટિકાનાયક શોભેત સૂક્તિહારલતા ॥ ૨૫॥

સરસસુમનોઽભિરામા સાધુ ચ સંસ્કારસમ્ભૃતોલ્લાસા ।
સમુપૈતિ સૂક્તિલતિકા સઙ્ગાદમૃતફલ તવ હિ સાફલ્યમ્ ॥ ૨૬॥

સત્પક્ષપાતસુભગં સન્માનસરસિકમમ્બુજાસક્તમ્ ।
ભુવનાશ્રયં વિશુદ્ધં બુધ્યે ઘટિકાવનૌકસં હંસમ્ ॥ ૨૭॥

સુમનોરસકૃતસઙ્ગં (સ્વ) સ્મરણવિશેષેણ તોષિતાનઙ્ગમ્ ।
કમલાલયાન્તરઙ્ગં કલયે ઘટિકાદ્રિકલ્પતરુભૃઙ્ગમ્ ॥ ૨૮॥

દુર્ગતિદુઃખિતચિત્તાન્ દુષ્કરયોગાન્ વિમુચ્ય સુખસેવ્યામ્ ।
પ્રાજ્ઞાઃ પ્રયાન્તિ નિત્યાં નિભૃતિં ઘઠિકાદ્રિભૂપમાલમ્બ્ય ॥ ૨૯॥

કલયન્તિ નૈવ સન્તઃ કાપુરુષદ્વારિ વારણાકદનમ્ ।
ઘટિકાશિખરિમુકુન્દં કમપિ નિધિં સુલભમનવધિં લબ્ધ્વા ॥ ૩૦॥

મકરમયકૂર્મરૂપં વરશઙ્ખં પદ્મમપિ મહાપદ્મમ્ ।
કુન્દમસિતં મુકુન્દં કો વા ઘટિકાદ્રિનવનિધિં ન ભજેત્ ॥ ૩૧॥

કાઞ્ચનમયે સ્ફુરન્તં કઞ્ચન ઘટિકામહીભૃતઃ કટકે ।
કૃષ્ણમણિમર્ઘરહિતં કે વા ન વિદન્તિ કૃત્સ્નતઃ શ્લાઘ્યમ્ ॥ ૩૨॥

સંસરણસરણિપાન્થાસ્તાપત્રયતરણિકિરણસન્તપ્તાઃ ।
આશ્વસિતા ઘટિકાદ્રૌ હરિચન્દનમેત્ય શીતલચ્છાયમ્ ॥ ૩૩॥

મુક્તં નિરઞ્જનબદ્ધં મૂલં જગતાં ફલં ચ ઘટિકાદ્રૌ ।
આકલયતાદ્ભુતં મહદાકણ્ઠં મનુજમાનને સિંહમ્ ॥ ૩૪॥

પશ્યન્તિ નયનહરિણાઃ સ્પષ્ટં ઘટિકાદ્રિલુબ્ધકં યાવત્ ।
પરિસરચરૈસ્તુ તાવત્ પાતકપતગૈઃ પલાયિતં ક્વાપિ ॥ ૩૫॥

વિમલમણિહેમકટકં વિકસિતવનમાલમુલ્લસન્મૌલિમ્ ।
ઘટિકાદ્રિસુહૃદમીડે કાઞ્ચનપીતાંશુકાવૃતં પ્રાંશુમ્ ॥ ૩૬॥

સદ્ભિઃ પરિગતમમલૈઃ સંશ્રિતસર્વસહં હિરણ્યકૃતમ્ ।
ઘટિકાદ્રિપં સુમેરું કલયે સર્વોત્તરં સુરૈઃ સેવ્યમ્ ॥ ૩૭॥

સરસમવિપ્લુતવેલં સમ્ભૃતમણિરાજસરસિજાશઙ્ખમ્ ।

ગમ્ભીરમમિતમમલં ગાહે ઘટિકાચલેશકલશાબ્ધિમ્ ॥ ૩૮॥

વિગતત્તમોગ્રહમચલં વૃદ્ધિક્ષયરહિતમનુદયાસ્તમયમ્ ।
વિકસિતમાનસકમલં વીક્ષે ઘટિકાદ્રિવિધુમહો વિમલમ્ ॥ ૩૯॥

નિરવધિકનિત્યમહસા નિર્મલમુક્તાનુબન્ધસુભગેન ।
ઘટિકાદ્રિમકુટભાજા મણિના મમ મનસિ વારિતં તિમિરમ્ ॥ ૪૦॥

અવિરલવિસૃમરસૃણિના હરિમણિના સતતમાહિતૌજ્જ્વલ્યઃ ।
ઘનકનકકલ્પિતોઽયં કટકો ઘટિકામહીભૃતો ભાતિ ॥ ૪૧॥

સુમનોભૃતેન મધુના સુતરાં મધુરેણ શુદ્ધિગુણભાજા ।
મમ ઘટિકાચલજનુષા માનસનામા સમુત્સુકો ભૃઙ્ગઃ ॥ ૪૨॥

અણુતરમપિ સ્વમન્યાનર્પયતઃ સતતમાપ્તુકામેન ।
ઘટિકાચલપ્રણયિના વિપુલં વિહિતં હિરણ્યદાનમહો ॥ ૪૩॥

અનનુગુણવિષયવીક્ષામનિદમ્પ્રથમાં સરસ્વતીં મુક્ત્વા ।
ઘટિકાચલપ્રણયિના ઘટયતિ દૃષ્ટિં ઘનાનુરાગમયીમ્ ॥ ૪૪॥

દૃશ્યેન દૈવયોગાદ્ દીવ્યન્મહસાઞ્જનાદ્યતીતેન ।
સાધયતિ સિદ્ધિમખિલાં સઙ્ગો ઘટિકાદ્રિયોગિપુરુષેણ ॥ ૪૫॥

પ્રબલૈર્મમેન્દ્રિયાશ્વૈઃ પરિતુષ્ટો વિષમવિષયકાન્તારે ।
પદવીં મનોરથાગ્ર્યાં પ્રાપ્તો ઘટિકાદ્રિપાર્થસારથિના ॥ ૪૬॥

અતિવેલવિલસિન્તોર્મેરવગાહવતામધોગમનહેતોઃ ।
પ્રાપ્તોઽસ્મિ ભવપયોધેઃ પારં ઘટિકાનિયામકેનાહમ્ ॥ ૪૭॥

ઘટિકા યદિ ગુણઘટિતા ઘટિકાચલચક્રિકલ્પિતા ન સ્યુઃ ।
ભવકૂપતો જલાનાં ભવ્યઃ કો વા સમુદ્ધરણહેતુઃ ॥ ૪૮॥

કલયન્તિ યે સ્વયાત્રાં ઘટિકાચલવૈદ્યકલ્પિતેન પથા ।
ભવરોગતોઽચિરાત્ તે મુક્તાઃ સ્નાનં ચરન્તિ વિરજાયામ્ ॥ ૪૯॥

દદતો જગત્યુદારાન્ સ્વાપેક્ષિતમર્થમર્થિનઃ પ્રાહુઃ ।
આદદતઃ પુનરર્થાનુક્તા ઘટિકાચલાર્થિનોદારાઃ ॥ ૫૦॥

દાતા હિ લૌકિકોઽર્થાન્ સ્વવ્યતિરિક્તાન્ દદાતિ નાત્માનમ્ ।
સ્વોઽપિ સ્વસંશ્રિતેભ્યો દત્તો ઘટિકાદ્રિનૃહરિણા દાત્રા ॥ ૫૧॥

હિંસિતદાનવકરિણે હૃદયગુહાવિહિતબહુવિહારાય ।
વિક્રમવતે સપર્યાં વિદધે ઘટિકાદ્રિવીરસિંહાય ॥ ૫૨॥

શ્રુતિપારગાય વિદ્યાસૂતિગૃહાય સ્વધર્મનિરતાય ।
સ્વસ્વોચિતં પ્રદાનં સુધિયાં ઘટિકાદ્રિભૂમિદેવાય ॥ ૫૩॥

મહનીયવૃત્તવર્ણા મહિતાન્વયવત્યલઙ્કૃતા કૃતિના ।
સૂક્તિસુતનુઃ પ્રદેયા શુદ્ધા ઘટિકાદ્રિસુરવરાય શુભા ॥ ૫૪॥

ગાં યો દદાતિ સાર્થાં ગલદમિતપ્રેમધારયા સહિતામ્ ।
ઘટિકાચલપ્રણયિને ઘટતે કિં તસ્ય કાઙ્ક્ષિતં નાલમ્ ॥ ૫૫॥

કલુષાપિ ઘટકવાક્યૈઃ ક્ષાલિતવૈમુખ્યકલ્મષા ધિષણા ।
પૃથુગુણભૃતે મદીયા સ્પૃહયતિ ઘટિકાચલપ્રિયાય ભૃશમ્ ॥ ૫૬॥

અન્વિચ્છતાન્યમથવા તૃષ્ણીમાધ્વં સુરર્ષિપિતૃમુખ્યાઃ ।
તત્કિઙ્કરોઽર્પિતોઽહં તજ્જ્ઞૈર્ઘટિકાદ્રિભૃભુજે સચિવૈઃ ॥ ૫૭॥

ક્રુધ્યન્ત્યનર્થકં યે ગોપ્ત્રે ઘટિકામહીભૃતો હરયે ।
મન્યે મન્દધિયસ્તાન્ માતઙ્ગાનેવ મદજુષઃ કલુષાન્ ॥ ૫૮॥

દુષ્ટાન્ નિગૃહ્ય તરસા શિષ્ટાનખિલાંશ્ચિરેણ પાલયતે ।
સ્વસ્તિ સુહૃદે ગુણાનાં ભૂત્યૈ ઘટિકાદ્રિભૂભુજે ભૂયાત્ ॥ ૫૯॥

મૃદુલં ભવાગ્નિપાકાદ્ વ્યાપ્તં ગુણતો વિશુદ્ધમહમન્નમ્ ।
ભોજ્યં સમર્પયે સ્વં ભોક્ત્રે ઘટિકાચલસ્ય સુસ્નેહમ્ ॥ ૬૦॥

નિત્યશ્રિયે ગુણાનાં નિધયે નિષ્ઠ્યૂતનિખિલદોષાય ।
પ્રજ્ઞાર્પિતા મયૈષા ભર્ત્રે ઘટિકાચલસ્ય ભાગ્યવશાત્ ॥ ૬૧॥

પાત્રે સમાશ્રિતાનાં શાસ્ત્રે સત્પુરુપ વિદ્વિષાં સતતમ્ ।
દાત્રે સકલફલાનાં નેત્રે જગતાં નમો નૃસિંહાય ॥ ૬૨॥

સુમનઃસમૂહભવ્યાચ્છુકમુખસેવ્યાત્ સુશીતલચ્છાયાત્ ।
ઘટિકાદ્રિતટવિરૂઢાત્ કલ્પતરોઃ કસ્ય કાઙ્ક્ષિતં ન ફલમ્ ॥ ૬૩॥

અવિરતહિતપ્રવૃત્તેરાપદિ સહિતાદકૃત્રિમસ્નેહાત્ ।
મમ ઘટિકાચલબન્ધોર્માન્યાદન્યેન કેન કિં કાર્યમ્ ॥ ૬૪॥

ઘનકરુણામૃતપૂરૈર્ઘટિકાચલકૃષ્ણમેઘતો જનિતૈઃ ।
પાપાટવી પ્રદગ્ધા ભજતે ચિત્રં ભવામ્બુધિઃ શોષમ્ ॥ ૬૫॥

ગોભિઃ પ્રકાશિતાર્થાદ્ ગોપ્તુર્ઘટિકાભિધાનવાદ્યુદિતાત્ ।
જાગર્તિ સતતનિદ્રં સવિતુર્જગતાં મનઃસરોજં મે ॥ ૬૬॥

રુષ્ટેન યેન રૌદ્રો રુગ્ણો ધરણિં જગામ શરભોઽપિ ।
સ ન દુરિતદન્તિનોઽસ્માદ્ ઘટિકાદ્રિહરેઃ કથં ન બિભ્યતિ મે ॥ ૬૭॥

અવ્યાહતપ્રચારાદવમતમન્ત્રૌષધાત્ સહસ્રાસ્યાત્ ।
પાતકમૂષકનિવહાત્ પાયાત્ ઘટિકાદ્રિભોગિનઃ કો વા ॥ ૬૮॥

કલિતપુરુષાર્થસાર્થાદ્ ઘટિકાઘટિતાત્ સનાતનાદ્ ધર્માત્ ।
કિં વા પ્રમાદ્યતાં સ્યાત્ ક્ષેમં હ્યત્રાપ્યમુત્ર વા પુંસામ્ ॥ ૬૯॥

ઘનસમયનિર્વ્યપેક્ષાદ્ ઘટિકાચલભૂમિભર્તુરુદ્ભૂતા ।
ક્ષાલયતિ કલુષમલિનં કાચન કરુણાતરઙ્ગિણી ભુવનમ્ ॥ ૭૦॥

સન્નિહિતશઙ્ખપદ્માત્ સર્વસખાત્ સકલપુણ્યજનસેવ્યાત્ ।
ઘટિકાદ્રિરાજરાજાત્ કા વા ન સ્યાત્ સમાશ્રિતા સમ્પત્ ॥ ૭૧॥

વૃજિનવિષાનલમૂર્ચ્છાવિમુષિતચિત્તાન્ ભવોરગગ્રસ્તાન્ ।
કુર્વીત લબ્ધસત્તાન્ કો વા ઘટિકાદ્રિગારુડિકતોઽન્યઃ ॥ ૭૨॥

નિત્યાન્નિરસ્તદોષાન્નિયતપદાત્ પુણ્યકીર્તનશ્રવણાત્ ।
વિનતોચિત્તાભિધાનાદ્ બ્રહ્મણ એવાધિગમ્યતે સકલમ્ ॥ ૭૩॥

શુદ્ધિમુપજનયતોઽગ્ર્યાં સ્વાલોકેનૈવ ચક્ષુષો જગતામ્ ।
ઘટિકાદ્રિમિત્રતોઽન્યં કલયેઽખિલલોકબાન્ધવં નાહમ્ ॥ ૭૪॥

અમૃતપ્રવાહસહજૈરાલોકૈરમલશીતલૈઃ સ્નપિતાઃ ।
વિવિધાન્ ભવદવદાહાન્ વિજહતિ ઘટિકાદ્રિવિલસિતસ્ય વિધોઃ ॥ ૭૫॥

ધર્મોત્તરં દ્વિપાદ્રેઃ શઙ્કે ઘટિકાદ્રિમત્ર ન વિવાદઃ ।
કેનાઙ્ગ્યકારિ નાસ્મિન્ કૃષ્ણમૃગસ્યાસ્ય નિયતસંવાસઃ ॥ ૭૬॥

અમૃતાર્પણં શ્રિતાનામભિદુરરસનત્વમાર્જવં ગમને ।
કથમિવ ચ ગરુડસખ્યં ઘટિકાચલકૃષ્ણભોગિનો ઘટતે ॥ ૭૭॥

આગઃસુ સંશ્રિતાનામનભિજ્ઞસ્યાત્મસામ્યદસ્યાહમ્ ।
નિયમેન સેવકઃ સ્યાં નિત્યં ઘટિકાદ્રિભૂમિપાલસ્ય ॥ ૭૮॥

સત્ત્વોત્તરસ્ય દાનં સદ્ભ્યો ઘટિકાદ્રિભૂભૃતો યુક્તમ્ ।

સુતરાં પાપરતાનાં યુજ્યેત કથં સુરદ્વિષાં દાનમ્ ॥ ૭૯॥

ઘટિકાદ્રિકામસુરભેઃ કાઙ્ક્ષાપદસકલફલદુહો જગતામ્ ।
માતુર્ગવાં મયિ સ્યાદ્ વત્સે બહુલં કથં ન વાત્સલ્યમ્ ॥ ૮૦॥

હન્ત ન જહત્યમોઘામાશિષમાયુઃ શ્રિયં પ્રયુઞ્જાનાઃ ।
ઘટિકાચલહરિચન્દનપાર્શ્વમહીનાઃ સુપાવનાહારાઃ ॥ ૮૧॥

સદમૃતફલસ્ય ઘટિકાશૈલગસાલસ્ય સવિધગસ્યાપિ ।
શબ્દાદિનિમ્બસેવાં સન્ત્યજતિં ન હન્તુ હૃદયકામો ॥ ૮૨॥

અમલાનુરાગસલિલૈરભિલાષમલાન્યપોહ્ય સકલાનિ ।
કુસુમૈરહિંસનાદ્યૈઃ કુર્યાં ઘટિકાદ્રિદૈવતસ્યાર્ચામ્ ॥ ૮૩॥

ધનદાદ્યૈરપિ ન પરૈઃ સાધ્યં સુમહદ્ધિરણ્યદાનં તત્ ।
સુકરેણ કૃતવતઃ સ્યાત્ તુલ્યો ઘટિકાદ્રિભૂભૃતઃ કો વા ॥ ૮૪॥

જનયત્યવતિ ચ સકલાંજ્ઞાપયતિ યો હિતાહિતે શાસ્ત્રાત્ ।
સામ્યે તુ તસ્ય કો વા જ્ઞાની ઘટિકાદ્રિસર્વજનકસ્ય ॥ ૮૫॥

દોષાકરે વિરાગં સૂર્યાલોકે વિકાસમામોદમ્ ।
પદ્માખ્યામપિ વહતો યુક્તં ઘટિકાદ્રિપસ્ય કેસરિતા ॥ ૮૬॥

તન્ત્રી મયાદ્ય લબ્ધા તપસા વિપુલેન ભક્તિકન્યેયમ્ ।
ભજતામવ્યભિચારં ભાવં ઘટિકાદ્રિમર્તરિ પ્રૌઢા ॥ ૮૭॥

ભાસ્વતિ સુરાસુરગુરૌ ભોગિનિ વ ન્દારુસૌમ્યમન્દારે ।
ઘટતામમાયઘટિતે ઘટિકાદ્રિવિધૌ કથં ગ્રહૈઃ પીડા ॥ ૮૮॥

સમવર્તિનિ ભુવનેશે પુણ્યજને પાવકે જગત્પ્રાણે ।
શ્રીદે શિવેઽપિ ઘટિકાશૈલહરૌ સતિ કિમન્યદિક્પાલૈઃ ॥ ૮૯॥

યસ્યોદયઃ પરાર્થો યસ્યાલોકેન યાત્યઘં વિલયમ્ ।
કાલે ચ બોધયતિ યો ઘટિકામિત્રેઽત્ર કો વિરાગી સ્યાત્ ॥ ૯૦॥

સરસે જાગ્રતિ ઘટિકાશૈલગતે સરસિજાલયે મોહાત્ ।
વિરસેષુ ચિત્તનામા વિષયક્ષરકેષુ વિભ્રમતિ ભૃઙ્ગઃ ॥ ૯૧॥

બિભ્રતિ સદૈવ લક્ષ્મીં વિભ્રામ્યતિ મિત્રમણ્ડલે વિદુષામ્ ।
ઘટિકાદ્રિસાર્વભૌમે ઘટતે કિં વા ન સંશ્રિતાભિમતમ્ ॥ ૯૨॥

શ્રિતઘટિકાચલશિખરે સ્થિરકરુણાપૂરનિર્ભરે શિશિરે ।
દીવ્યન્તિ વિમલપક્ષા દિવ્યે કમલાલયે ચિરં હંસાઃ ॥ ૯૩॥

વિહરતિ બહુગુણજાલે વીરે ઘટિકાદ્રિકૃષ્ણવર્ત્મનિભે ।
વિજહતિ સમસ્તતાપાન્ વિજયન્તે મૃત્યુમપિ વિમોહમહો ॥ ૯૪॥

કનકમયકટકશોભાં કલયતિ ઘટિકામહીભૃતો રુચિરે ।
દીપ્તિમતિ કૃષ્ણરત્ને દૃષ્ટે ત્રાસલવમનુભવેત્ કો વા ॥ ૯૫॥

સપ્તર્ષિસેવ્યમાને સન્તતસુમનસ્કૃતે સહસ્રાક્ષે ।
રમતાં મનો હરૌ મે રાજતિ ઘટિકાદ્રિરત્નસાનુતટે ॥ ૯૬॥

પાદસ્પર્શનવિભવાત્ પાવિતભુવને પ્રબોધિતાત્મગણે ।
ભજતિ ઘટિકાદ્રિમિત્રે ભગવતિ ભાવં મનઃસરોજં મે ॥ ૯૭॥

તુષ્ટેઽલ્પતઃ સુશીલે સુગુણગૃહીતે સુલક્ષણે સુદૃઢે ।
આરોપિતો મદીયો ભદ્રે ઘટિકાદ્રિધૂર્વહે ભારઃ ॥ ૯૮॥

અનનુગુણામપિ વાણીમાગઃસન્દોહમન્દમતિકલિતામ્ ।
અઙ્ગીકરોતુ ભગવાનાશ્રિતદોષાવલોકનાકલ્યઃ ॥ ૯૯॥

સ્વામિન એવ કૃતિર્મે સૂક્તિસ્તોષાય તદપિ તસ્યૈષા ।
સ્વોક્તમનુવદતિ બાલે સુતરાં તાતો હિ તોષમુપયાતિ ॥ ૧૦૦॥

ભક્તોચિતોપયુક્તાં ભક્ત્યા સૌમ્યવરકિઙ્કરોપહૃતામ્ ।
અમૃતફલાવલિમનઘાં મૃદુલામાસ્વાદ્ય મૃત્યુમતિયન્તિ ॥ ૧૦૧॥

ઇતિ શ્રીઘટિકાદ્રિનાથશતકં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૫૭)

The Ghatikddrindihashataka (57) is a eulogy in Arya metre on God Nrsimha at Ghatikacala or Sholinghur (on the upper hill) in North Arcot District. The author must have been a Srivaisnava; he pays obeisance to one Venkatacarya in the opening verse and .calls himself a devotee of Saumyavara (Manavalamamuni) in the concluding verse of the Stotra.

Proofread by Rajesh Thyagarajan

*Ghatikadrinatha Shatakam*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*